ISSN : 2582-9092

# निर्वचनशास्त्रे दैव्यापदः प्रबन्धनम्

आचार्य डॉ. रामकिशोर मिश्र (प्राध्यापक)
नीलेश कुमार तिवारी (शोधछात्र)

**शोधसारः**— यदा प्रभृतिरियं सृष्टिः प्रादुर्भूता प्रलयावस्थातो निर्गत्य संसारचक्रं प्रवर्तते तत आरभ्य सर्वे प्राणिनः द्वन्दे प्रवृत्ता दृश्यन्ते, ते वारं वारं दैव्यापदया निहन्यन्ते। यदि वयं मानवेतिहासमवलोकयामः तत्र पदे पदे प्राणिनःदैव्यापदाभिः दुष्प्रभाविताः, अनेकधा एतादृशीभिरापद्भिस्तेषामस्तित्वमपि विलीनतां गतम्,तेषु कतिपयप्राणिनः एतादृश अपि सन्ति, ये दैव्यापदायाः पूर्वाभासं प्राप्तुं समर्थाः अतस्ते दैव्यापदाक्रमणेन सुरक्षिता भवन्ति।

परमात्मन एतादृशी सृष्टिरस्ति यत्र मनुष्योऽन्येभ्यः सर्वेभ्यः प्राणिभ्योऽधिकः बुद्धिमान्, तथापि सः सरीसृप–पशु–पक्षि–आदिभिः सदृशी पूर्वाभासशक्तिं न निधत्ते। परन्त्वयं स्वबुद्धिबलेन सर्वदा दैव्यापदां प्रतीकर्तुं समर्थोऽभूत्। सफलतायाः प्रतिशतं भवेत् किमपि, परन्तु इदं सर्वथा सत्यमस्ति यदसौ दैव्यापदासंभावितविनाशेन स्वसत्तां रक्षितुं समर्थो बभूव। अयमस्य प्रकुतेरूपरि विजयमेव।

अद्यायं यक्षप्रश्नोऽस्याः शोधगोष्ठ्याः समक्षे विद्यते यत् कथं मनुष्यः पुराकाले यदा वर्तमानयुगवद् विज्ञानस्योन्नतिर्नासीत् तदा स्वं रक्षितुं कथं समर्थो जातः, अद्यासौ विकासस्य अनेकानि सोपनानि उत्तरन् शिखरमध्य आस्ते यत्रोपसर्पणस्य पूर्वजैः कल्पनापि न कृता।

**भूमिका** — विश्वस्य पुरातनतमं साहित्यं वेद एव इति वयं निर्विवादरूपेण वक्तुं शक्नुमः, अपरञ्च भारतीयपरम्परा त्वस्य अपौरूषेयत्वं स्वीकरोति। एतद्विशिष्टतमस्य साहित्यस्याध्ययनेन केचन प्रेरणाप्रदाः परिणामाः प्राप्यन्ते ये अतीव रूचिकराः। प्राचीनभारतीयपरम्परा कथानकपथाधाना आसीत् इति वेदस्याध्ययनेन प्रमाणीभवति , अस्माकीना ये पूर्वजाः साक्षात्कृतधर्माण ऋषयः आसन् तेष्वियं प्रवृत्तिर्दृश्यते, अत एव यास्केन भणितम्—**'ऋषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता '।**[1] यास्कप्रतिपादिता वेदानुशीलनस्य या दृष्टिरस्ति तत्र एतादृशः अनेकविधाः प्रसङ्गाः दरीदृश्यन्ते यत्र दैव्यापदायाः स्वरूपं तन्निराकरणञ्च प्रतिपादितम्। अत्र अस्मिन् शोधनिबन्धे तेष्वन्यतमं प्रकरणमुपस्थाप्यते।

आचार्ययास्को वेदार्थं विवृण्वन् एकस्मिन् स्थाने निर्ब्रवीति — **'देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः। स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे। ततः शन्तनो राज्ये द्वादशवर्षाणि देंवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमतिरिच्याभिषेचितं तस्मात्ते देवो न वर्षतीति। स शन्तनुर्देवापिं शिशिक्ष राज्येन तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति। तस्यैतद्वर्षकामसूक्तम्।**[2] अत्र समुद्रशब्दनिर्वचनप्रसङ्गे आचार्ययास्कः कुरूवंशस्येतिहासं प्रतिपादयन् ब्रूते यत् ऋष्टिषेणस्य देवापिशन्तनुनामनी द्वौ पुत्रौ आस्ताम्। अनुजः शन्तनुः येन केन प्रकारेण स्वमभिषिषेच, निर्विण्णो देवापिररण्ये गत्वा तपः प्रारेभे , अनेन शन्तनुराज्ये द्वादशवर्षाणि यावत् मेघो न ववर्ष। शन्तनुना ऋषयः प्रार्थिता अकालनिवारणाय , ऋषय ऊचुः यस्त्वं ज्येष्ठभ्रातरं विहाय स्वमभिषिक्तवान्, अतस्तव राज्ये मेघो न वर्षति, शन्तनुः राज्यं प्रतिग्रहीतुं देवापिः प्रार्थितः परन्तु देवापिना उक्तो यदहं तव पुरोहितो भविष्यामि

ISSN : 2582-9092

दुर्भिविनाशाय यज्ञं कारयिष्ये।

उपर्युक्तविवरणेनेदं विस्पष्टीभवति मनुष्यस्य जीवने दैव्यापदानामागमनं तदैव भवति यदासौ धर्मं विहाय अधर्ममनचरति। अत्रापि षड्यन्त्रेण शन्तनुः स्वराज्याभिषेकं कारयति , खिन्नो देवापिः स्वाधिकारं प्राप्तुं युद्धस्य मार्ग विहाय स्वं तपोमार्गे नयति। एतदनाचारं वीक्ष्य देवा अपि क्रुद्धा बभूवुः, तैः शन्तनुराज्ये दुर्भिक्षस्थितिर्निर्मिता। प्रकृतिसमक्षे विवशः शन्तनुः राज्यं समर्पयितुं उद्यतो भवति। परन्तु देवापिः यस्य पूर्वं राज्यस्येहा आसीत् , अधुना दैवकृपां लब्ध्वा राज्यं प्रतिग्रहीतुं नोत्सुकः , असावस्य स्थाने पुरोहितधर्मं स्वीचकार। यदा एतादृशाः पुरोहिता भवन्ति , तदैव कस्यचिद्यज्ञं सफलं भवति, देवापिकृतयज्ञेन शन्तनुराज्ये देवो ववर्ष। यदि वयं सदाचारं विहाय अनाचारस्य मार्गमवलम्बयिष्यामस्तर्हि आपदानामागमनमस्माकं जीवने अवश्यम्भावीति।

अधिकारस्यापहरणं स्वत्वस्य वोन्मूलनं न सामान्या स्थितिः, यदि कश्चित् गृहागतातिथिना सहोचितं नाचरते, मनुमते सत्कारमप्राप्त एतादृग् अतिथिः अन्वाहार्य–गार्हपत्य– आहवनीय–आवसथ्य–प्रभृतियज्ञानां पुण्यं हरति–

**शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः।**
**सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्।।**[3]

महर्षिमनोराशयो विद्यते यत् ऋषि–पितर–देव–भूत–अतिथयः एते सर्वेऽपि गृहस्थादपेक्षन्ते, अतः शास्त्रज्ञैः कर्तव्यमस्ति भवन्ति , इमे तर्पणीयाः।

कथमेते तृप्ता भवन्ति, अमुं प्रतिपादयन् मनुः ब्रूते स्वाध्यायेन अर्थात् वेदपाठेन ऋषयः, विधिपूर्वकहोमकरणेन देवाः, श्रद्धेन पितरः, अन्नेन मनुष्याः बलिकर्मकरणेनान्यभूतानां सन्तुष्टिर्भवति। अतो शास्त्रविधिमनुसरन् एते तर्पणीयाः–

**स्वाध्यायेनार्चयेद् ऋषीन् होमैर्देवान् यथाविधि।**
**पितृन् श्राद्धैश्च नृनन्नैर्भूतानि बलिकर्मणा।।**[4]

उपर्युक्तप्रमाणेनेदमपि स्पष्टं भवति देवानां सहयोगं प्राप्तं भवेत्, वयमापदाभिः प्रताडिता न स्याम , एतदर्थमस्माभिर्यज्ञोऽवश्यमेव करणीयः। अत एव वैदिकसाहित्ये ब्राह्मणग्रन्थेष्वनेकशो भणितम्– **यज्ञो वै श्रेष्ठतमं कर्म।**[5] **यज्ञौ वै देवानामात्मा।**[6]

महर्षियास्केनापि निरूक्ते देवापिशन्तनुकथानकमाध्यमेन अमुं सत्यमेव प्रतिपादितम्। शन्तनो राज्ये दुर्भिक्षवारणाय यत्समाधानं यास्केन समुपस्थापितं तदपि यज्ञरूप एव।

महर्षिदयानन्दः सम्पूर्णदोषाणां परिहाराय यज्ञस्योपयोगिता स्पष्टरूपेण प्रत्यपादयत्, यजुर्वेदभाष्यं कुर्वन्नसौ यज्ञस्य माहात्म्यमेवं निरुपयति – **ईश्वरेणाग्निसूर्यावेतदर्थौ रचितौ यदिमौ सर्वेषां पदार्थानां मध्ये प्रविष्टौ जलौषधिरसान् छित्वा, वायुं प्राप्य मेघमण्डलं गत्वाऽऽगत्य च शुद्धिसुखकारका भवेयुस्तस्मान्मनुष्यैरूत्तमसुखलाभायाग्नौ सुगन्ध्यादिपदार्थानां होमेन वायुवृष्टिजलशुद्धिद्वारा दिव्यसुखानामुत्पादनाय संप्रीत्या नित्यं यज्ञः करणीयः। यतः सर्वे दोषा नष्टा भूत्वाऽस्मिन् विश्वे सततं शुद्धा गुणाः प्रकाशिता भवेयुः।**[7]

एकस्मिन्नन्यस्थाने ऋषिवरदयानन्दो निवेदयति– **' ये यज्ञादिना शुद्धान् जलादिपदार्थान्**

**सेवन्ते, तेषामुपरि सुखामुतस्य वृष्टिः सततं भवति।'**[8] अनेनेदं सिध्यति यद् आचार्ययास्केन यत्सत्यं प्रतिपादिपं तत्प्रमाणीभवति वेदनयेन तन्मार्गमनुसरद्भिश्च विद्वद्भिरपि। अत एव यज्ञो यज्ञमार्गश्च नोपेक्षणीयः , यदि वयं दैवानुकम्पामिच्छामः।

यथा महर्षिमनुः द्विजेभ्यो यज्ञमपरिहार्य कर्म स्वीकुरूते तथैवासौ य इमं पथं नावलम्बते तान् सर्वस्माद् द्विजकर्मणःबहिस्करोति–

**न तिष्ठति तु यः पूर्वा नोपस्ते यश्च पश्चिमाम्।**
**स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः।।**[9]

मनुस्मृतिमुपसहरन् स्वकर्मभ्रष्टानामधर्मपथानुगामिनां परिणतिं विवेचयन् प्रतिपादयन् मनः कथयति–

**वान्ताश्युल्कामुखः प्रेतो विंप्रो धर्मात् स्वकाच्च्युतः।**
**अमेध्यकुणपाशी च क्षत्रियःकटपूतनः।।171।।**[10]

स्वधर्माच्च्युतः ब्रह्मणोवमनादिकृतस्य भोक्ता रक्तमुखवान् प्रेतो जायते, यदि क्षत्रियः स्वधर्मात् भ्रष्टो भवति तर्हि सः दुर्गन्धयुक्तः सरीसृपः पुरीषादिसर्वस्याभक्षस्य च भक्षकः कटपूतननाम पिशाचो भवति।

**मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक्।**
**चैलाशकश्च भवति शूद्रो धर्मात् स्वकाच्चयुतः।।72।।**[11]

एवं स्वधर्माच्च्युतो वैश्य पूयभुक् अर्थात् विकृतात् क्षतात् यो मलप्रवाह जायते तस्य भक्षकः मैत्राक्षज्योतिकः प्रेतो भवति। शूद्रश्च वस्त्रेषु या यूका निवसति तस्य खादको जन्तुरूपेण जायते।

उपर्युक्तविवेचनेनेदं तथ्यं सुप्रतिपादितं भवति यन्मनुष्यस्य जीवने आचरणस्य महत्त्वं सदाचारस्योपयोगिता च सर्वाधिकमहत्त्वपूर्ण स्थानं भजतः। यः सदाचारशीलः स एव धार्मिकः, अत एव मनुना आचारः परमधर्मरूपेण अनुमोदितः।[12] आचारच्युतो विप्रो वेदफलं नाश्नुते यश्च आचारवान् स सम्पूर्णवेदोक्तफलभाग्भवति।[13]

अभिज्ञानशाकुन्तले यदा शकुन्तलां पुरस्कृत्य काश्यपशिष्या आगच्छन्ति, तेषामागमनस्य सूचनामात्रेण कथं दुष्यन्तमनसि आशक्ङा जायते, तं वर्णयन् महाकविः कालिदासः उवाच–

**किं तावद् व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितम्**
**धर्मारण्यचरेषुकेनचिदुत प्राणिष्वसच्चेष्टितम्।**
**आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरूधा–**
**मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः।।**[14]

किमुपोढतपसां तपस्विनां तपः केनाति दुष्टेन दूषितम्? अथवा धर्मारण्यक्षेत्रे विचरणं कुर्वाणेन केनापि प्राणिना गर्हितमाचरितम्? अथवा मम दुश्चरितैः व्रततिभिः फलं प्रतिबन्धितम्? इति नानाविधाभिराशक्ङाभिर्मे मनः आकुलं वर्तते।

ISSN : 2582-9092

वेदेनापि मनुष्याणां कृते काचन मर्यादाः स्वीकृताः, तासामुल्लङ्घनेन स पापवान् भवति, वेदे निगदितम्–

**सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिछभ्यंहुरो गात्।**
**आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरूणेषु तस्थौ।।**[15]

उक्त सप्तमर्यादासु स्तेयम्, भ्रूणहत्या, अनृतोद्यम् , तल्पारोहणम् इत्यादयः पातकाः सन्ति। एते पातका नोल्लङ्घनीयाः। तथा च एते पातकमहापातकरूपेण स्वीकृताः स्मृतिग्रन्थेषु।

उपर्युक्तप्रमाणेन ज्ञायते यन्महाकविकालिदासस्य दृष्टौ दुराचरणेन मनुष्या दैव्यप्रकोपं प्राप्नुवन्ति। दैव्यापदानिमन्त्रयितारः स्मो यदि वयं धर्मानुरूपमाचरणं न चरामः।

अयं मनुष्यप्रकृतिर्यदयं लोभवशेनानर्थमाचरति यस्य गम्भीरपरिणामाः असुखदाः परिणतिः मनुष्यस्य जीवने आपतति। यद्यसौ सावधानमनसा सर्वथाऽवहितो भूत्वा , पथप्रदर्शनकरणे समर्थाः से स्युः, तेषां सन्निधिमवाप्य तत्प्रदर्शितपथे प्रवृत्तो भवति तर्हि अस्य पथः सुप्रशस्तो भवितु मर्हति। निरूक्तेऽपि महाराजशन्तनुरधर्माचरणजनितसमस्यायाःसमाधानार्थं मौद्गल्यप्रभृतिऋषीणां सन्निधौ गच्छति। तेऽपि ऋषयः तं देवापेः समीपं गन्तुं प्रेरयन्ति।

अत्रायं प्रश्नः समुदेति ऋषयः शन्तनुं कथं देवापे समीपं गन्तुं प्रेरयन्? अस्य प्रश्नस्य द्वावुत्तरौ सम्भवतः, प्रथमः–येन कारणेन रोगो जायते, तस्य शमनं विना रोगो शमयितुं न शक्यः। दैव्यप्रकोपस्य कारणं देवापेः स्वत्वापहरणं तत्प्रतिनिवृत्तिं विना दैव्यापदाया उपसंहारो न भवितुमर्हति, अत एव ऋषयः शन्तनुं ज्येष्टभ्रातुः देवापिसमीपे प्रेषितवन्तः।द्वितीयः– अपरं कारणं तदेव यद् यास्केन प्रतिपादितम्, यास्कः देवापिशब्दस्य निर्वचनं कर्वन् ब्रूते–'देवापिर्देवानामाप्त्या'।[16] अस्यायमाशयो यस्य देवेन सह तादाम्यं घनिष्ठता वा वर्तते स दवापिः। यास्कस्य मन्तव्यमेतत् प्रतीयते यद्येन तपोबलेन मन्त्रसिद्धिःदेवतासिद्धिर्वा कृता स देवापिः। केवलमन्त्रपाठमात्रेण देवता न सिध्यति, यद्येवं स्यात् तर्हि सर्वेऽपि मन्त्रपाठिनःसिद्धाः स्युः। ब्राह्मणग्रन्थेषु स्पष्टरूपेण प्रतिपादितम्– **'परोक्षप्रिया इवहि देवा प्रत्यक्षद्विषः'** देवाः प्रत्यक्षप्रिया न भवन्ति, यस्तु स्वतपोबलेन देवं प्रत्यक्षं करोति सैव तमश्नुते। अस्मिन् प्रसग्ङे यास्को वदति– **'देवापिस्तपः प्रतिपेदे।'**[17] तपोबलेनैव देवापिः तत्सामर्थ्यमवाप येन वर्षाकरणसमर्थदेवेन सह स ऐक्यमधिगतः। अमुं प्रसग्ङमधिकस्पष्टरूपेण व्याहरन् निरूक्तस्य प्राचीनभाष्यकारः स्कन्दस्वामी शंसति– **'स च किल च्यवननामापरनाम्नि ऋष्टिषेणे ब्रह्मचर्यमुवास। स गुर्वनुग्रहात् तेनैव शरीरेण वीतहव्यवद् विश्वामित्रवच्च ब्राह्मणो बभुव।'**[18] एतत्तपः प्रभावो गुर्वनुग्रहो वा येन देवापिरनेनैव शरीरेण वीतहव्यऋषिवत् विश्वामित्रऋषिवच्च ब्राह्मणत्वमवाप।

ऋग्वेदस्य दशमे मण्डल आगतस्य वर्षकामसूक्तेनोक्ततथ्यस्य पुष्टिर्भवति। मन्त्रो वदति–

**आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान्**
**स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि।।**[19]

ऋष्टिषेणस्य पुत्रो वा शिष्यो वा देवापिः होतृरूपेण वृतः सन् देवाः भूय वृष्टिमवश्यमेव करिष्यन्ति, यतोहि असौ देवसुमतिम् अर्थात् देवानां शुभमतिं जानन् यज्ञकरणाय प्रवृत्तः। देवापिकृतयज्ञप्रभावात् उपरिस्थितसमृद्राद् अन्तरिक्षाद् दिव्या दिवि भवा अपः अधरम् अर्वाग् स्थितं समृद्रं वृष्टिजलेनापूरयन् सर्वतः।

पूवोक्तप्रकरणं विवर्णयन् आचार्ययास्क एकमन्त्रं मन्त्रं प्रस्तौति–

यदा देवापिः होतृरूपेण वृतः सन् कृपायमाणः अनावृष्टिदुःखनिवारणाय स्वचित्तं देवान् प्रति न्यवेशत् तदा देवश्रुतम् वृतः सन् कृपायमाणः अनावृष्टिवनिम् अर्थात् वृष्टिं याचमानाय देवापये बृहस्पतिः उत्तरमदात्। कथनस्यायमभिप्रायः बृहस्पतिः देवापेः प्रार्थनां निशम्य वर्षारूपेणोत्तनं ददौ, भृशं वर्षा चकार।

मनष्यस्य जीवने जानन्नजानन् अनेके अपराधाः भवन्ति, तेभ्यो विमुक्तये वेदे प्रार्थना विहिता। ऋग्वेदस्य ऋषिरस्य महत्त्वं निरूपयन् वदति–

**मुञ्चन्तु मा शपथ्या ३ दथो वरूण्यादुत।**
**अथो यमस्य पड्बीशात् सर्वस्वाद् देवकिल्बिषात्।।**[21]

ओषधयः शपथाज्जातात् एनसः वरूण्यात् अर्थात् वरणीय श्रेष्ठपुषान् प्रति कृतापराधात् यमस्य अर्थात् वायुजनितपड्बीशात् पादबन्धनरोगात् , किञ्च सर्वस्मात् देवकिल्बिषात् समस्तइन्द्रियजन्यदोषेभ्यो मां मुञ्चन्तु।

महर्षिदयानन्देन स्वसाहित्ये सर्वत्र दंरितेभ्यो विमुक्तये भद्रकर्मप्राप्तये वेदमन्त्रेण प्रार्थना विहिता–

**विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न ऽ आ सुव।।**[22]

ईश्वरस्तुतिप्रार्थनामन्त्रान् उपसंहरन् असौ पुनः एतादृशं मन्त्रमुपस्थापयति यस्मिन् कृटिलतायुक्तैनसो मुक्तये प्रार्थना कृता–

**अग्ने नय सुपथा राये ऽ अस्मान् विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽ उक्तिं विधेम।।**[23]

आचार्ययास्को वेदार्थस्य विशिष्टप्रकियायाः प्रतिनिधित्वं विधत्ते, अतो नैरूक्तदृष्ट्या वेदे लौकिकेतिहासिकी घटना भवितुं नार्हति , अस्माकीनाः सनातनपरम्पराः वेदमपौरूषेयं स्वीकुर्वन्ति एतस्मात् कारणात् वेद इतिहासो न सम्भाव्यते। परन्तु यास्कसदृशः वेदमनीषी ऐतिहासिकीं घटनां समुपस्थापयति, अस्य एतदेव कारणमस्ति यत् क्वचित् मन्त्रेषु कथायाः संकेता उपलभ्यन्ते पे मायावत् मिथ्या भवन्ति, वेदः स्वयमेव संशयं निराकुर्वन् ब्रूते– **'मायेत्सा ते यानि सुद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से।'**[24] प्रस्तुतप्रसग्ङेआर्ष्टिषेणः, देवापिः, शन्तनुः, पुरोहितः एते चत्वारः शब्दा एतादृशाःसन्ति यान् वीक्ष्य वेद इतिहासस्य सन्देहो भवति। यद्यपीदं प्रकरणं नैरूक्तप्रक्रियाप्रतिपादनायन समर्पितं तथापीदं ज्ञापनं समीचीनं प्रतीयते यद्वेद तिस्रो दिव्यशक्तयः पुरोहितनाम्ना अभिहिताः ताः सन्ति–अग्निः, वायु , आदित्यश्च।[25] एते त्रयो देवाः हविः गृहीत्वा गच्छन्ति अन्येभ्यो देवेभ्यः। एते त्रयो देवा देवान् अश्नुवन्ति अतो वेदे पुरोहितनाम्ना अभिहिताः।

उक्ताप्रसग्ङं समुपसंहरन् वयमिदं वक्तुं शक्नुमो यत् वेददृष्ट्या दैव्यप्रकोपस्यैकं प्रमुखं कारणं च वर्तमानजन्मकृताधर्माचरणमस्ति, तेनापि मनुष्यजीवने विविधा उपद्रवा दृश्यन्ते तान् शमनाय च यज्ञमवश्यमेव करणीयमिति यास्कसम्मते समाधानम्।।

ISSN : 2582-9092

# सन्दर्भसूची

1- निरू., 10.10.
2- निरू., 2.10
3- मनु. 3.100
4- मनु. 3.81
5- का. 30.1., क. 46.7 , तै.सं. 3.2.1.4 , शत. ब्रा. 1.7.1.5
6- कौ. ब्रा. 25.11, शत. ब्रा. 9.3.2.7
7- यजुर्वेदभाष्य 1.13
8- यजुर्वेदभाष्य 36.12
9- मनु. 2.103
10- मनु. 12.71
11- मनु. 12.72
12- मनु. 1.108 आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च। तस्मादस्मिन् यदा युक्तो नित्यं स्यादात्मनाव् द्विजः।।
13- मनु. 1.1.8 आचाराद् विच्यतो विप्रो न वेदफलमश्नुते। आचारेण तु संयुक्तः सम्पूर्णफलाभाग्भवेत्।।
14- अभिज्ञानशाकुन्तलम् 5.1
15- ऋ. 10.5.6
16- निरू. 2.10
17- निरू. 2.10
18- स्कन्दनिरूक्तभाष्य 2.10
19- ऋ. 10.98.5
20- ऋ. 10.98.7
21- ऋ. 10.97.16
22- यजु. 30.3
23- यजु. 40.16
24- ऋ.10.54.2
25- ऋ. 8.44.3, 10.66.13, ऐ.ब्रा. 8.27 वायुर्वाव पुरोहिताः।

शा. स्नातकोत्तर संस्कृत महाविद्यालय,
रायपुर (छ.ग.)